# Purushottamaproktam Kamadevarati Stotram

# પુરુષોત્તમપ્રોક્તં કામદેવરતિસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Kamadevarati Stotram

File name : puruShottamaproktaMkAmadevaratistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 63/79-93||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં કામદેવરતિસ્તોત્રમ્

શ્રીપુરુષોત્તમ ઉવાચ ।
ચૈત્રમાસે શુક્લપક્ષે હ્યેકાદશ્યાં પ્રગે શુભે ।
ગત્વાऽऽરામે ગ્રહીતવ્યા દિવ્યા દમનમઞ્જરી ॥ ૭૯॥

ગુર્વાજ્ઞયા પ્રકર્તવ્યં પૂજનં દમનસ્ય વૈ ।
દમને તિષ્ઠતે કામદેવશ્ચ રતિસંયુતઃ ॥ ૮૦॥

“કામદેવ નમસ્તેऽસ્તુ ત્વં સદા પુરુષોત્તમઃ ।
હરિં કામં વિચિનોમિ કૃપાં કુરુ મમોપરિ” ॥ ૮૧॥

ગીતવાદિત્રનિર્ઘોષૈરાનેતવ્યો ગૃહં પ્રતિ ।
અધિવાસનપૂર્વં ચ સર્વતોભદ્રમણ્ડલે ॥ ૮૨॥

સ્થાપયિત્વા હરિં કામં રતિં ચ દમનદ્રુમમ્ ।
આચ્છાદ્ય શ્વેતવસ્ત્રેણ પૂજયેત્ કન્યકા પ્રિયે ॥ ૮૩॥

ક્લીં કામદેવાય નમો હ્રીમ્ ।
રત્યૈ ચ નમો નમઃ ।
પૂર્વસ્યાં હ્રીં ચ કન્દર્પં પૂજયામિ નિશાऽऽગમે ॥ ૮૪॥

ગન્ધપુષ્પાક્ષતધૂપદીપનૈવેદ્યકૈઃ શુભૈઃ ।
આરાર્ત્રિકાદિભિર્દેવં પૂજયામિ પતિં પ્રભુમ્ ॥ ૮૫॥

મદનાય નમઃ પ્રાચ્યાં મન્મથાય નમોऽગ્નિકે ।
કન્દર્પાય નમો યામ્યેऽનઙ્ગાય નમો નૈરૃતે ॥ ૮૬॥

વારુણ્યાં મોહનાય નમઃ સ્મરાય નમોऽનિલે ।
કૌબેર્યામીશ્વરાય નમઃ પુષ્પબાણાયૈશાન્યાં નમઃ ॥ ૮૭॥

સર્વદિક્ષુ નમસ્કૃત્ય માં કન્યા પૂજયેત્ તતઃ ।
“ૐ કન્દર્પપુરુષાય વિદ્મહે કામદેવાય ધીમહિ ।

તન્નોઽનઙ્ગઃ પ્રચોદયાત્” ॥ ૮૮॥

ઇતિ ચાષ્ટોત્તરશતજપાન્ કુર્યાદ્ધિ સન્નિધૌ ।
(Above mantra to be uttered .. 108 times)
નમોઽસ્તુ કામપતયે પુષ્પશરાય તે નમઃ ॥ ૮૯॥

મન્મથાયાઽઽનન્દદાત્રે નમો રતિકરાય તે ।
પ્રીતિદાય નમસ્તેઽસ્તુ સર્વબીજાય તે નમઃ ॥ ૯૦॥

કાન્તાય કાન્તરૂપાય સર્વવાસાય તે નમઃ ।
પુરુષોત્તમરૂપાયાઽનઙ્ગદેવાય તે નમઃ ॥ ૯૧॥

અનાદિશ્રીકૃષ્ણનારાયણ વાઞ્છિતકામદ ।
હૃત્સ્થાન્ પૂરય કામાન્મે પ્રભો કામેશ્વરીપ્રિય” ॥ ૯૨॥

સ્તુત્વૈવં મઞ્જરી વારિ દાતવ્યે મમ પાદયોઃ ।
ગીતવાદિત્રનૃત્યૈશ્ચ કર્તવ્યશ્ચોત્સવો મહાન્ ॥ ૯૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૬૩-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં કામદેવ-રતિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૬૩/૭૯-૯૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 63/79-93..

Proofread by PSA Easwaran

*Purushottamaproktam Kamadevarati Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*